No. of Printed Pages : 7

# 5907

Register Number | | | | | | |

# Language — Part I — SANSKRIT

Time Allowed : 3.00 Hours ] [ Maximum Marks : 90

**Instructions :** (1) Check the question paper for fairness of printing. If there is any lack of fairness, inform the Hall Supervisor immediately.

(2) Use **Blue** or **Black** ink to write and underline and pencil to draw diagrams.

**Note :** (i) Answers should be in English, Sanskrit or Tamil except for those which are to be answered in Sanskrit.

(ii) In writing Sanskrit, Devanāgari script should be used.

## PART - I

अधोलिखितानां प्रश्नानां **समीचीनं** उत्तरं लिखत। **14x1=14**

Choose the **correct** answer.

1. ''सुनीतिकुसुममाला'' ग्रन्थस्य रचयिता कः ?

(a) अप्पादीक्षितः (b) श्रीकण्ठशास्त्री (c) नीलकण्ठदीक्षितः

2. सन्मुखात् वल्लभः तव सुतः इति श्रुते का सुखं भजेत् ?

(a) भ्राता (b) भगिनी (c) माता

3. सन्यासदीक्षानन्तरं नरेन्द्रस्य नाम किम् ?

(a) विवेकानन्दः (b) देवानन्दः (c) सदानन्दः

4. रामस्य शत्रुः कः ?

(a) लक्ष्मणः (b) भीमः (c) रावणः

[ Turn over

https://www.tamilnaduboard.com

**5.** कृष्णः कं जघान ?

(a) वंशं (b) कंसं (c) अंसं

**6.** स्वामी विवेकानन्दः भाषणार्थं कुत्र गतवान् ?

(a) वाषिङ्टन् (b) पारीस् (c) शिकागो

**7.** किं पुष्पमालानुषङ्गेण शिरसि धार्यते ?

(a) पत्रम् (b) सूत्रम् (c) पात्रम्

**8.** पर्वतकः केषां वचनानि शृणोति ?

(a) मुनीनाम् (b) शास्त्राणां (c) मित्राणां

**9.** साधोः आश्रमं कुत्र वर्तते ?

(a) वनान्तिके (b) नगरे (c) नदीतीरे

**10.** कृपणः कति तण्डुलं दरिद्राय अयच्छत् ?

(a) एकमुष्टि (b) पञ्चमुष्टि (c) बहुमुष्ठि

**11.** कीदृशं जलं पिबेत् ?

(a) सत्यपूतम् (b) वस्त्रपूतम् (c) दृष्टिपूतं

**12.** कथं कार्यं समाचरेत् ?

(a) दृष्टिपूतम् (b) मनःपूतम् (c) वस्त्रपूतम्

**13.** __________ उपनिषदि गुणत्रयकथा प्रतिपादिता।

(a) बृहदारण्यक (b) छान्दोग्य (c) कठ

**14.** देवानां, मनुष्याणाम्, असुराणां च पिता कः ?

(a) प्रजापतिः (b) कुलपतिः (c) बृहस्पतिः

https://www.tamilnaduboard.com

## PART - II

### SECTION - 1

त्रयाणां उत्तरं लिखत। **3x2=6**

Answer **any three** of the following :

**15.** कोपस्य परिणाम: कीदृश: ?
What is the effect of Anger ?

**16.** सुशीलदु:शीलयो: फलं किम् ?
What are the outcomes of Good Conduct and Bad Conduct ?

**17.** युतकस्य किं किं नास्ति ?
What are not available for a shirt ?

**18.** विद्या कथं अनुत्तमा भवति ?
How does the learning become the most superior ?

### SECTION - 2

द्वयो: प्रश्नयो: उत्तरं लिखत। **2x2=4**

Answer **any two** of the following :

**19.** स्वामी विवेकानन्दस्य पितरौ कौ ?
Who are the parents of Swami Vivekananda ?

**20.** गान्धारदेशस्य राजा क: आसीत् ?
Who was the king of Gandhara Country ?

**21.** साधु: किं कर्तुं कृपणम् आदिशत् ?
What did the saint order to the miser ?

### SECTION - 3

व्याकरण विशेषा: (Grammar) **7x2=14**

Answer **any seven** of the following :

**22.** अधो दत्तानां शब्दानां अर्थं लिखत। (meanings) :

(a) सुत: _________ (son, daughter, wife)

(b) युवक: _________ (aged, child, youth)

[ Turn over

https://www.tamilnaduboard.com

**23.** आम् अथवा न इति लिखत। (Write Yes or No)

(a) प्रजापतेः चत्वारः पुत्रगणाः आसन्।

(b) परोपकाराय फलन्ति वृक्षाः।

**24.** सन्धिं कुरुत (Combine)

(a) तव + इति = __________ (तवैति, तवेति, तवति)

(b) चेत् + अयम् = __________ (चेदयम्, चदयम्, चेयम्)

**25.** सन्धि विच्छेदं कुरुत। (Split the words)

(a) नास्ति = __________ (ना + अस्ति, न + अस्ति, न + आस्ति)

(b) अधनास्तु = __________ (अधनाः + तु, अधन + अस्तु, अ + धनास्तु)

**26.** विपरीतपदानि लिखत। (Write the opposite words)

(a) धर्मः × __________ (कर्मः, अधर्मः, भूमः)

(b) सुखम् × __________ (दुःखम्, समम्, बलम्)

**27.** समानार्थकं पदं लिखत। (Synonyms)

(a) निशा __________ (रात्री, उषा, आषा)

(b) नरः __________ (देवः, मनुष्यः, अजः)

**28.** रिक्तस्थानानि पूरयत। (Fill in the blanks)

(a) नरेन्द्रस्य जन्म __________ नगरे अभवत्। (चेन्नै, कोलकत्ता, दिल्ली)

(b) गिरिकः एकः __________ (काकः, पिकः, शुकः)

**29.** समासः (Compound)

(a) अहश्च निशा च = __________।

(अहिशं, अनिशं, अहर्निशम्)

(b) सूर्यस्य पुत्रः = __________।

(आर्यः, सूर्यपुत्रः, भार्यपूत्रः)

**30.** योजयत (Match the following)

(a) मैत्रीं भजत - मेघगर्जनम्

(b) मनुष्याः - चन्द्रशेखराचार्यः

(c) देवाः - गुरुः

(d) प्रजापतिः - स्वार्थाः

https://www.tamilnaduboard.com

## PART - III

### SECTION - 1

द्वयोः प्रश्नयोः संग्रहेण उत्तरं लिखत। **2x4=8**

Answer **any two** of the following briefly.

**31.** का धर्मवर्धनं करोति?

What increases merits ?

**32.** जीवनस्य फलं कदा भवेत्?

When will the life become fruitful ?

**33.** साधवः कं रक्षन्ति? पशुपतेः च किं वाहनम्?

Whom do the good persons protect ? What is the vehicle of Lord Siva ?

**34.** धीर्गुणाः के?

What are the qualities of intelligence ?

### SECTION - 2

द्वयोः प्रश्नयोः संग्रहेण उत्तरं लिखत। **2x4=8**

Answer **any two** of the following briefly.

**35.** विवेकानन्दस्य अध्यात्मगुरुः कः? तस्य दर्शनं कुत्र सञ्जातम्?

Who is the spiritual preceptor of Vivekananda ? Where did their meeting take place ?

**36.** कः आश्रमे राजानं स्वागतम् अकरोत्?

Who welcomed the king in the hermitage ?

**37.** साधुः जनान् किं कुर्वन् आसीत्?

What was the ascetic doing to people ?

**38.** प्रजापतिः स्वपुत्रगणान् किम् उपदिदेश?

What did Prajapati preach to his group of sons ?

[ Turn over

https://www.tamilnaduboard.com

**SECTION - 3**

शब्दरूपं लिखत। **3x4=12**

Decline the following :

**39.** युष्मद् (OR) तद् स्त्रीलिङ्गः (OR) तद् नपुंसकलिङ्गः (Neuter gender)

धातुरूपान् लिखत - Conjugate **any two** of the following :

**40.** भू (भव्) - लोट् - Imperative mood

**41.** कर् - लोट् - Imperative mood

**42.** वद् - विधिलिङ् - Potential mood

**43.** अस् - विधिलिङ् - Potential mood

**PART - IV**

सविस्तरं उत्तरं लिखत। **3x6=18**

Answer the following in detail.

**44.** (a) द्रविडसूक्तितः त्रीन् श्लोकान् व्याख्यात।

Explain any three slokas from Dravida Suktayaha lesson.

**OR**

(b) अमृतवाणी पाठात् धर्मस्य त्रीन् गुणान् विवृणुत।

Explain any three qualities of Dharma from the lesson "Amritha Vani."

**45.** (a) स्वामी विवेकानन्दं अधिकृत्य यथामति स्वभाषया संक्षिप्य लिखत।

Write in short in your language as you know about Swamy Vivekananda.

**OR**

(b) साधुवचनं यथाग्रन्थं स्वभाषया लिखत।

Write in your own words the "Saying of a Saint" as per the lesson.

https://www.tamilnaduboard.com

**46.** (a) श्लोकानां अनुवादं कुरुत।

Translate the slokas.

(i) अस्थि नास्ति शिरो नास्ति बाहुरस्ति निरङ्गुलिः।
नास्ति पादद्वयं गाढम् अङ्गमालिङ्गति स्वयम्।।

(ii) अश्वमेधसहस्रं च सत्यं च तुलया धृतम्।
अश्वमेधसहस्रेभ्यो सत्यमेव विशिष्यते।।

**OR**

(b) Translate the passage into English.

कश्चन अन्धयुवकः प्रतिदिनं गुरोः उपदेशार्थं समीपस्थम् आश्रमं गच्छति स्म। एकदा गुरोः प्रवचनं श्रुत्वा सः अन्धः पृष्टवान् – जीवने ज्ञानस्य प्रयोजनं किम्? इति। प्रवचनानन्तरं गुरुः बहिः आगतवान्। तदा बहिः महान् अन्धकारः आसीत्। तदा गुरुः अन्धम् अवदत् – भोः बहिः महान् अन्धकारः। अतः दीपं नय इति। अन्धः प्रत्युवाच – ''किं प्रयोजनं एतेन दीपेन। अहं तु अन्धः'' – इति। गुरुः अवदत् – ''एषः दीपः भवते मार्गं न दर्शयति, किन्तु ये जनाः भवतः पुरतः आगच्छन्ति ते मार्गात् अपसरन्ति इति। गुरोः वचनानुसारेण सः अप्रकाशमानं दीपं अनयत्। किन्तु मार्गे केनचित् पुरुषेण घट्टनं अभवत्। तत्क्षणे अन्धयुवकस्य हस्ते दीपः अधः अपतत्। अनन्तरदिने युवकः गुरुम् एतां दुरवस्थाम् अवदत्। गुरुः अवदत्-केवलं दीपस्य नयनेन अपि किमपि न प्रयोजनम्। अप्रकाशमानस्य दीपस्य पुरतः आगन्तृभिः कथं दृश्येत?'' अतः अप्रज्वलितः दीपः यथा व्यर्थः स्यात् तथैव ज्ञानस्य ज्योतिः विना जीवनमपि व्यर्थं भवेत् इति।

## PART - V

**47.** अनुच्छेदं पठित्वा प्रश्नानां उत्तरं लिखत। **6x1=6**

Read the passage and answer the questions below :

कश्चन अजशावकः नद्यां जलं पिबन् आसीत्। कश्चन वृकः तं दृष्ट्वा आहारार्थं केनापि व्याजेन तं हन्तुं ऐच्छत्। सः तं मेषपोतं कोपेन एवम् अपृच्छत् – रे धूर्त!, मया पीयमानं जलं कुतः आविलङ्करोषि? इति। अजशिशुः सविनयं प्रत्यवदत् – ''भद्र, भवान् उन्नततरे प्रदेशे जलं पिबति। जलं च त्वत्तः मत्समीपं प्रवहति। कथं तव जलं मलिनयितुं अहं शन्कुयाम?'' इति। ततः वृकः उवाच –'' अस्तु, किमर्थं त्वं षण्मासेभ्यः पूर्वं मां अनिन्दः। तेन अपराधेन इदानीं त्वां हनिष्यामि इति। अजशावकः भयेन वेपमानः प्रत्यब्रवीत्।''हन्त! जातस्य मम मासत्रयमपि न व्यतीतम्! षण्मासेभ्यः प्राक् अहं त्वाम् अनिन्दं इति कथं संभावनीयम्?'' इति भृशं कोपाविष्टः वृकः क्रूरेण स्वरेण अजशावकं अवदत् – ''रे दुष्ट! किमर्थं निर्भयः प्रजल्पसि, यदि त्वं न अनिन्दः नूनं तव पिता तथा अकरोत्। अत्र न कोऽपि विशेषः'' इत्युक्त्वा सः मेषपोतस्य उपरि निपत्य तं व्यापादयामास।

**प्रश्नाः –**

(1) कः नद्यां जलं पिबन् आसीत्?

(2) कः अजशावकं हन्तुं ऐच्छत्?

(3) वृकः तं दृष्ट्वा किम् अपृच्छत्?

(4) वृकस्य क्रूरवचनात् वेपमानः अजशावकः किं प्रत्यवदत्?

(5) कोपाविष्टः वृकः किम् अवदत्?

(6) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

-o0o-

https://www.tamilnaduboard.com